स्कैन किया

Durgasanker Shastri

Suklaya yajurvedia karmapayukta mantra samuchchaya.

शुक्ल यजुर्वेदीय कर्मोपयुक्तमन्त्र समुच्चय।

Sanskrit

Printed on paper

1928 (1852 sakabda)

Folio: 48

10.5" x 5"

complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शास्त्रिदुर्गाशङ्करसंस्कृतग्रन्थमालायाः कर्मकाण्डविभागेचतुर्थंपुष्पम् ।

शुक्लयजुर्वेदीयकर्मोपयुक्तमन्त्रसमुच्चयः (मन्त्रसंहिता)

सिद्धपद (सिद्धपुर) निवासिना ठाकरोपाह्वविद्वद्वर-उमाशङ्करतनुजनुषा श्रीवालुकेश्वरसंस्कृतवैदिकपाठशालाप्रधा-
नाध्यापकेन दुर्गाशङ्करशास्त्रिणा लोकोपकृतये टिप्पण्यादिभिः समलङ्कृत्य परिशोध्यच प्रकाशिता ॥

शकाब्दाः १८५० । विक्रमाब्दाः १९८४ । खिस्ताब्दाः १९२८ ।

अस्य पुनर्मुद्रणे सर्वेऽधिकारा राजशासनानुसारेण प्रकाशयित्रा स्वायत्तीकृताः ।

प्रथमावृत्तिः ।

जगद्गुरु विश्वाराध्य सिंहासन
ज्ञानमंदिरम्
A-151

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशायनमः॥ अथ शुक्लयजुर्वेदमाध्यन्दिनीयानां संस्कार
शान्त्यादिकर्मोपयुक्तमन्त्रसमुच्चयः॥ श्रीभाईशङ्कराज्जातः स-
उमाशङ्करोद्विजः। पितामेसुकृतीजन्मप्रदातागुरुरादिमः॥शुक्लो
पाह्वमहानन्दतनयोदेवशङ्करः। दीक्षागुरुर्द्वितीयोऽगात्पश्चाद्भू-
त्वायतिर्दिवम्॥वेदान्तादिबृहद्विद्यांसरहस्यामुपादिशत्। गुरुः
श्रीचेतनानन्दब्रह्मचारी तृतीयकः॥ स्मृत्वैतान् त्रीन्गुरून्क-
र्मोपयुक्तंमन्त्रसञ्चयम्। ग्रथ्नाम्यमुं शुक्लयजुर्वेदीयद्विजहेतवे॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं० अथ शान्तिसूक्तम् ॥ ओँ ऋचंवाचम्प्रपद्येमनोयजुःप्रपद्ये स०
॥ १ ॥ सामंप्राणम्प्रपद्येचक्षुःश्रोत्रम्प्रपद्ये॥वागोजः सहौजोमयिप्रा
णापानौ॥ १ १/३६ ॥ यन्मेच्छिद्रञ्चक्षुषोहृदयस्यमनसोवातितृण्ण
म्बृहस्पतिर्मेतद्दधातु ॥शन्नोभवतुभुवनस्ययस्पतिः॥२ २/३६॥
भूर्भुवःस्वः ॥ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि॥धियोयो

---

१ अत्र पदादिसत्वेपि न द्वित्वम् ॥ एकाच् सत्वात् ॥ शिक्षा ३२ तत्र अमोघनन्दिन्यां शिक्षायाम् वो वां वा वै मन्त्रपाठे लघवो गुरवः पदे॥ पदपाठेतु "वाम्" इत्याद्युदाहरणानिस्वय-मूह्यानि ॥ शिक्षायामपि तदर्थवाचिनो वो वां वा वै यदि निपातजौ । आदेराजविकल्पार्थौ ईषत्स्पृष्टा इति स्मृताः ॥ ॥ १ ॥

२ अत्र अर्धमंत्रः सन्ध्यभावात् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नः प्प्रचोदयात्॥ ३ ३/३६ ॥ कयानश्चित्रऽआभुवदूतीसदावृधः सखा।
कयाशचिष्ठयावृता ॥ ४ ४/३६ ॥ कस्त्वासत्योमदानाम्मꣳहिष्ठोम-
त्सदन्धसः ॥ दृढाचिदारुजेव्वसु ॥ ५ ५/३६ ॥ अभीषुणः सखीनाम
विताजरितॄणाम् ॥ शतम्भवास्यूतिभिः ॥ ६ ६/३६ ॥ कयात्वन्नऽ
ऊत्याभिप्प्रमन्दसेव्वृषन्॥कयास्तोतृब्भ्यऽआभर॥ ७ ७/३६ ॥इन्द्रो
व्विश्वस्यराजति ॥ शन्नोऽअस्तुद्द्विपदेशञ्चतुष्प्पदे ॥ ८ ८/३६ ॥ शन्नो
मित्रः शंव्वरुणः शन्नोभवत्वर्य्यमा॥शन्नऽइन्द्रोबृहस्प्पतिः शन्नो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्विष्ष्णुरुरुक्क्रमः॥ ९ $\frac{९}{३६}$ ॥ शन्नोव्वातः पवताᳫं शन्नस्तपतु सूर्य्यः॥
शन्नः कनिक्क्रदद्देवः पर्ज्जन्न्यो ऽअभिवर्षतु॥ १० $\frac{१०}{३६}$ ॥ अहानि शम्भव
न्तु नः शᳫं रात्रीः प्प्रतिधीयताम्॥ शन्न ऽइन्द्राग्नी भवतामवोभिः
शन्न ऽइन्द्रावरुणा रातहव्व्या ॥ शन्न ऽइन्द्रापूषणा व्वाजसातौ श
मिन्द्रासोमा सुविताय शंय्योः ॥ ११ $\frac{११}{३६}$ ॥ शन्नो देवीरभिष्ष्टय ऽ
आपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः॥ १२ $\frac{१२}{३६}$ ॥ स्योना पृ
थिवि नो भवानृक्षरा निवेशनी॥ यच्छा नः शर्म्म सप्प्रथाः॥ १३ $\frac{१३}{३६}$ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन ॥ महेरणायचक्षसे ॥
१४ १४/३६ ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमा
तरः ॥ १५ १५/३६ ॥ तस्म्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ ॥ आ
पोजनयथाचनः ॥ १६ १६/३६ ॥ द्यौःशान्तिरन्तरिक्षꣳशान्तिःपृथि
वीशान्तिरापःशान्तिरोषधयःशान्तिः ॥ वनस्प्पतयःशान्ति
र्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्वꣳशान्तिःशान्तिरेवशा
न्तिःसामाशान्तिरेधि ॥ १७ १७/३६ ॥ दृतेदृꣳहमामित्रस्यमाचक्षुषा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं० सर्व्वाणिभूतानिसमीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुषासर्व्वाणिभूता स०
॥ ३ ॥ निसमीक्षे ॥ मित्रस्यचक्षुषासमीक्षामहे ॥१८ १८/३६ ॥दृतेदृꣳहमा ॥
ज्योक्तेसन्दृशिजीव्यासञ्ज्योक्तेसन्दृशिजीव्यासम्॥१९ १९/३६॥नम
स्तेहरसेशोचिषेनमस्तेऽअस्त्वर्च्चिषे ॥ अन्याँस्तेऽअस्मत्तपन्तु
हेतयः पावकोऽअस्मभ्यꣳशिवोभव ॥२० २०/३६ ॥ नमस्तेऽअस्तु
विद्युतेनमस्तेस्तनयित्नवे ॥ नमस्तेभगवन्नस्तुयतःस्वः समी
हसे॥२१ २१/३६ ॥यतोयतःसमीहसेततोनोऽअभयङ्कुरु ॥ शन्नः कुरु ॥ ३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्प्रजाभ्यो॒भयन्नः॑पशुभ्य॑÷ ॥ २२ २२/३६ ॥ सुमि॒त्रिया॒नऽआप॒ऽओष॑-
धयः॑सन्तुदु॒र्म्मित्रिया॒स्तस्म्मै॑सन्तु॒य्यो॒स्म्मान्द्वे॒ष्ट्टि॒यञ्च॑व॒यन्द्वि॒-
ष्म्मः॑॥ २३ २३/३६ ॥ तच्चक्षु॑र्दे॒वहि॑तम्पु॒रस्ता॑च्छु॒क्कमुच्च॑रत् ॥ पश्श्येम
श॒रदः॑÷श॒तञ्जी॑वेम श॒रदः॑÷श॒तःशृणु॑याम श॒रदः॑ ÷ श॒तम्प्रब्ब्र॑वाम
श॒रदः॑÷श॒तमदी॑नाःस्याम श॒रदः॑ ÷ श॒तम्भूय॑श्च श॒रदः॑÷श॒तात् ॥
२४ २४/३६ ॥ ॐ शान्तिःशान्तिःशान्तिः ॥ इति शान्तिसूक्तम् ॥

अथभद्रसूक्तम् ॥ ॐ आनो॑भ॒द्राः क्क्रत॑वो यन्तुवि॒श्श्वतो॒दं॑ब्धा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सोऽअपरीतासऽउद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्प्रा
युवोरक्षितारोदिवेदिवे ॥ २५ $\frac{१४}{२५}$ ॥ देवानाम्भद्रासुमतिरृजूयता
न्देवानाᳩरातिरभिनोनिवर्त्तताम् ॥ देवानाᳩसख्यमुपसेदिमा
व्वयन्देवानऽआयुःप्प्रतिरन्तुजीवसे ॥ २६ $\frac{१५}{२५}$ ॥ तान्पूर्व्वयानिवि
दाहूमहेव्वयम्भगम्मित्रमदितिन्दक्षमस्स्रिधम् ॥ अर्य्यमणंव्व
रुणᳩसोमम्मश्विनासरस्वतीनःसुभगामयस्करत् ॥ २७ $\frac{१६}{२५}$ ॥
तन्नोव्वातोमयोभुव्वातुभेषजन्तन्माताप्पृथिवीतत्पिताद्यौः ॥ तद्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिषण्यासुवम्
॥ २८ १७/२५ ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियजिन्वमवसेहू
महेव्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धःस्व
स्तयें ॥ २९ १८/२५ ॥ स्वस्तिनऽइन्द्रोव्वृद्धश्श्रवाःस्वस्तिनः पूषाव्वि
श्ववेदाः ॥ स्वस्तिनस्ताक्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्प
तिर्दधातु ॥ ३० १९/२५ ॥ पृषदश्वामरुतःपृश्निमातरःशुभंय्यावा
नोव्विदथेषुजग्ग्मयः ॥ अग्निजिह्वामनवःसूरचक्षसोव्विश्वेनो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवाऽअवसागमन्निह ॥ ३१ २०/२५ ॥ भद्रङ्कर्णेभिःशृणुयामदेवा
भद्रम्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभि
र्व्यशेमहिदेवहितंय्यदायुः ॥ ३२ २१/२५ ॥ शतमिन्नुशरदोऽअन्तिदेवा
यत्रानश्चक्राजरसन्तनूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानो
मद्ध्यारीरिषतायुर्गन्तोः ॥ ३३ २२/२५ ॥ अदितिर्द्यौरदितिरन्तरिक्ष
मदितिर्म्मातासपितासपुत्रः ॥ विश्वेदेवाऽअदितिःपञ्चजनाऽअ
दितिर्ज्जातमदितिर्ज्जनित्वम् ॥ ३४ २३/२५ ॥ शिखाबन्धनमन्त्रः—

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः

॥ मानोव्वीरान्रुद्र भामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवामहे

॥ ३५ १६/१६ ॥ पवित्रधारणमंत्रः—पवित्रेस्थोव्वैष्णव्यौसवितुर्व्वः

प्प्रसवऽउत्पुनाम्म्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥

३६ १२/१ ॥ तस्यतेपवित्रपतेपवित्रपूतस्ययत्त्कामःपुनेतच्छकेय

म् ॥ ३६ ४/४ ॥ तिलकधारणमन्त्रः—स्वस्तिनऽइन्द्रोवृद्धश्रवाः

स्वस्तिनःपूषाविश्ववेदाः॥स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्तिनो बृहस्पतिर्दधातु॥ ३७ $\frac{१९}{२५}$ ॥ दिग्रक्षणमन्त्राः—रक्षोहणंव्व
लगहनंवैष्णवीमिदमहन्तंव्वलगमुत्किरामियम्मेनिष्ट्योयम
मात्योनिचखानेदमहन्तंव्वलगमुत्किरामियम्मेंसमानोयमसं
मानोनिचखानेदमहन्तंव्वलगमुत्किरामियम्मेसबन्धुर्य्यमसंब
न्धुर्न्निचखानेदमहन्तंव्वलगमुत्किरामियम्मेंसजातोयमसंजा
तोनिचखानोत्कृत्याङ्किरामि ॥ ३८ $\frac{२१}{५}$ ॥ रक्षोहणोवोव्वलगहनः
प्प्रोक्षामिव्वैष्णवान्रक्षोहणोवोव्वलगहनोवनयामिवैष्णवान्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्षोहणौवोवलगहनोवंस्तृणामिवैष्णवान्रक्षोहणौवांवलगहना
ऽउपंदधामिवैष्णवीरंक्षोहणौवांवलगहनौपर्य्यूहामिवैष्णवी
वैष्णवमांसिवैष्णवाःस्त्थ ॥ ३९ $\frac{२५}{५}$ ॥ रक्षसांभागोसिनिरस्त꣡ꣳर
क्षंऽइदमहꣳरक्षोभितिष्ठामीदमहꣳरक्षोवबाधऽइदमहꣳरक्षोंध
मन्तमोंनयामि ॥ घृतेनद्यावापृथिवीप्प्रोर्णुवाथांव्वायोव्वेस्तोका
नांमग्निराज्ज्यंस्यव्वेतुस्वाहास्वाहाकृतेऽऊर्ध्वनभसम्मारुतङ्ग
च्छतम् ॥ ४० $\frac{२६}{६}$ ॥ रक्षोहाव्विश्वचर्षणिरभियोनिमयोंहते ॥ द्रोणे

२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सधस्थमासंदत् ॥ ४१ २६/२६ ॥ अन्येदिग्रक्षणमन्त्राः—कृणुष्वपा
जः प्रसितिन्नपृथ्वींयाहिराजेवामवाँ२ऽइभेन ॥ तृष्वीमनुप्र
सितिन्द्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः ॥ ४२ ९/१३ ॥ तवभ्र
मासऽआशुयापतन्त्यनुस्पृशधृषताशोशुचानः ॥ तपूँष्य
ग्नेजुह्वापतङ्गानसंन्दितोविसृजविष्वगुल्काः ॥ ४३ १०/१३ ॥ प्रति
स्पशोविसृजतूर्णितमोभवापायुर्विशोऽअस्याऽअदब्धः ॥ यो
नोदूरेऽअघशंसोयोऽअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥ ४४ ११/१३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ उदग्ग्नेतिष्ठ प्प्रत्यातंनुष्ष्वन्न्यमित्राँ२ऽओषतात्तिग्ग्महेते॥ यो
नोऽअरातिᳬसमिधानचक्क्रेनीचातन्धंक्ष्यतसन्नशुष्क्कम्॥४५ $\frac{१२}{१३}$॥
उद्धर्वोभवप्प्रातिंविद्ध्याद्धस्म्मदाविष्क्कृणुष्ष्वदैव्यांन्यग्ग्ने॥ अवं
स्थिरातंनुहियातुजूनांजामिमजामिम्प्रमृणीहिशत्रून्॥अग्ग्नेष्ट्वा
तेजंसासादयामि॥४६ $\frac{१३}{१३}$॥वरुणावाहनमन्त्रः-तत्त्वांयामिब्रह्मं
णाव्वन्दंमानस्तदाशांस्तेयजंमानोहविर्ब्भिः॥ अहेडमानोव्वरु
णेहबोध्युरुशᳬसमानऽआयुःप्रमोषीः॥४७ $\frac{४१}{१८}$॥ प्रतिष्ठापनम-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्त्रः-मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳसमिमन्दधातु॥ विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ॥४८ १३/२॥प्रोक्षणमन्त्राः-आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन॥ महेरणायचक्षसे ॥४९ ५०/११॥ योवःशिवतमोरसस्तस्यभाजयतेहनः॥उशतीरिवमातरः॥५० ५१/११ ॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ॥ आपोजनयथाचनः ॥५१ ५२/११॥ दीपपूजनमन्त्रः-अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्योज्योतिर्ज्योतिः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूर्य्यःस्वाहा ॥ अग्निर्व्वर्चोज्ज्योतिर्व्वर्च्चःस्वाहासूर्य्योव्वर्चोज्ज्यो
तिर्व्वर्च्चःस्वाहा ॥ ज्योतिःसूर्य्यःसूर्य्योज्ज्योतिःस्वाहा॥५२ $\frac{१९}{३}$॥
गणेशावाहनमन्त्रः— गणानान्त्वागणपतिꣳहवामहेप्प्रियाणा
न्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसो
मम॥ आहमजानिगर्ब्भधमात्वमजासिगर्ब्भधम्॥५३ $\frac{१९}{२३}$ ॥आ
सनमन्त्रौ–वर्ष्मोऽस्मिसमानानामुद्यतामिवसूर्यः।इमन्तमभि
तिष्ठामियोमाकश्चाभिदासति॥पा०गृ०का०१ कं० ३मं०८॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं० पुरुषऽएवेदꣳसर्वंयद्भूतंयच्चभाव्यम् ॥ उतामृतत्वस्येशानोय सं०
॥ ९ ॥ दन्नेनातिरोहति ॥ ५४ २/३१ ॥ पाद्यमन्त्रः—एतावानस्यमहिमा
तोज्ज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतं
न्दिवि ॥ ५५ ३/३१ ॥ अर्घमन्त्रौ—धामन्तेविश्वम्भुवनमधिश्रित
मन्तःसमुद्रेहृद्यन्तरायुषि ॥ अपामनीकेसमिथेयऽआभृतस्त
मश्याममधुमन्तन्तऽऊर्म्मिम् ॥ ५६ ११/१७ ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषः ॥ ९ ॥
पादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अभि ॥ ५७ ४/३१ ॥ आचमनीयमन्त्रौ–इमम्मेव्वरुणश्श्रुधीहवम्
द्याचमृडय ॥ त्वामवस्युराचके ॥ ५८ १/२१ ॥ ततोव्विराडजाय
तव्विराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिम
थोपुरः ॥ ५९ ५/३१ ॥ स्नानमन्त्रः–तस्माद्यज्ञात्सर्व्वहुतःसम्भृत
म्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेव्वायव्यानारण्याग्राम्म्याश्चये
॥ ६० ६/३१ ॥ पञ्चामृतस्नानमन्त्रौ–पञ्चनद्यः सरस्वतीमपियन्ति
सस्रोतसः ॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित् ॥ ६१ ११/३४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं० घृतेनसीतामधुनासमंज्यतांविश्वैर्देवैरनुमतामरुद्भिः॥ ऊर्ज्ज स०
॥ १० ॥ स्वतीपयसापिन्वमानास्मान्त्सीतेपयसाभ्याववृत्स्व॥ ६२ ७०/१२॥
पयःस्नानमन्त्रः-पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरि
क्षेपयोधाः॥ पयस्वतीःप्रदिशःसन्तुमह्यम्॥ ६३ ३६/१८ ॥दधि
स्नानमन्त्रः—दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः
॥ सुरभिनोमुखाकरत्प्रणऽआयूंषितारिषत् ॥ ६४ ३२/२३ ॥ घृत
स्नानमन्त्रौ-घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्य ॥ १० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धामं ॥ अनुष्ष्वधमावंहमादयंस्वस्वाहांकृतंवृषभवक्षिहव्यम्
॥ ६५ ८८/१७ ॥ घृतङ्घृतपावानःपिबतवसांवसापावानःपिबतान्त
रिक्षस्यहविरसिस्वाहा ॥ दिशःप्रदिशऽआदिशोविदिशऽउ
द्दिशोदिग्भ्यःस्वाहा ॥ ६६ १९/६ ॥ मधुस्नानमन्त्राः—मधुवाताऽ
ऋतायतेमधुक्षरन्तिसिन्धवः॥माध्वीर्न्नःसन्त्वोषधीः॥६७ २७/१३॥
मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता
॥ ६८ २८/१३ ॥ मधुमान्नोवनस्पतिर्म्मधुमाँ२अस्तुसूर्यः॥ मा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ध्वीर्गावो॑भवन्तुनः॥६९ २९/१३॥शार्करास्नानमन्त्रः—अपा॒ᳪरस॒मुद्व॑
यस॒ᳪसूर्य्ये॑सन्त॒ᳪस॒माहि॑तम् ॥ अपा॒ᳪरस॑स्य॒योरस॒स्तंव्वो॑गृ
ह्णाम्म्युत्त॒मम॑मुपया॒मगृ॑हीतोसीन्द्रा॑यत्वा॒जुष्ट॑ङ्गृह्णाम्म्ये॒षते॒योनि॒
रिन्द्रा॑यत्वा॒जुष्ट॑तमम् ॥ ७० ३/१ ॥ गन्धोदकस्नानमन्त्रः—ग॒
न्ध॒र्व्वस्त्वा॑वि॒श्वाव॑सुः॒परि॑दधातु॒वि॒श्वस्या॒रिष्ट्यै॒यज॑मानस्यपरि॒
धिर॑स्यग्निरि॒डऽई॒डि॒तः॥ ७१ ३/२ ॥उद्धर्तनस्नानमन्त्रः—अ॒ᳪशु

नांतेऽअ॒ᳪशुः पृ॑च्यतां॒परु॑षा॒परुः॥ गन्धस्ते॒सोमं॑मवतु॒मदा॑यर ॥ ११ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सोऽअच्युतः॥७२ २७/२०॥ शुद्धोदकस्नानमन्त्रः—शुद्धवालः सर्वशुं
द्धवालोमणिवालस्तऽआंश्विनाः श्येतः श्येताक्षोरुणस्तेरुद्रा
यंपशुपतयेकर्णायामाऽअवलिप्तारौद्रानभोरूपाः पार्जन्याः
॥७३ ३/२४॥वस्त्रार्पणमन्त्राः—सुजातोज्योतिषासहशर्म्मवरूथमा
संदत्स्वः॥वासोऽअग्नेविश्वरूपः संव्ययस्वविभावसो॥७३
४०/११ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानिजज्ञिरे॥छन्दांसिजज्ञि
रेतस्माद्यजुस्तस्मादजायत ॥७४ ७/३१॥ युवासुवासाःपरिवीत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आगात्सउश्रेयान्भवतिजायमानः॥ तंधीरासःकवयउन्नयन्ति
स्वाध्योमनसादेवयन्तः॥पा०गृ०का०२मं०९॥ यज्ञोपवीतार्प
णमन्त्रौ-यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात्॥आ
युष्यमग्र्यंप्रतिमुञ्चशुभ्रंयज्ञोपवीतंबलमस्तुतेजः ॥ पा० गृ०
का०२ कं०२ क्षेपक०॥ तस्म्माद्श्वाऽअजायन्तयेकेचोभयाद
तः॥गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः ॥७५ ८/३१ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गन्धार्पणमन्त्रौ—त्वाङ्गन्धुर्व्वाऽअंखनँस्त्वामिन्द्रुस्त्वाम्बृहुस्प्प
तिं÷ ॥ त्वामौषधेसोमोराजांव्विद्वान्यक्ष्मांदमुच्च्यत ॥७६ $\frac{९८}{१२}$ ॥
तंऽयुज्ञम्बुर्हिषिप्प्रौक्षुन्न्पुरुंषञ्जातमंग्ग्रतश्॥ तेनंदेवाऽअंयजन्त
साध्याऽऋषंयश्च्चुये ॥७७ $\frac{९}{३१}$ ॥ अक्षतार्पणमन्त्रः-अक्षुन्नमींमद
न्तुह्यवंप्प्रियाऽअंधूषत ॥ अस्तौषतुस्वभांनवोव्विप्प्रानविंष्ठया
मतीयोजान्विन्द्रतेहरी॥७८ $\frac{५१}{३}$ ॥ पुष्पार्पणमन्त्रौ-ओषंधीःप्प्र
तिंमोदद्ध्वुम्पुष्पंवतीःप्प्रसूवंरीः ॥ अश्वांऽइवसुजित्त्वंरीव्वींरुधंः÷

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 पारयिष्णवः॥ ७९ $\frac{७७}{१२}$ ॥ सत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥
 मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाउच्यते ॥ ८० $\frac{१०}{३१}$ ॥ दूर्वा
ङ्कुरार्पणमंत्रः-काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि ॥ ए-
वानोदूर्वेप्रतनुसहस्रेणशतेनच ॥ ८१ $\frac{२०}{१३}$ ॥ सौभाग्यद्रव्यार्प
णमंत्रः-अहिरिवभोगैःपर्य्येतिबाहुंज्यायाहेतिम्परिबाधमानः
॥ हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमांसम्परिपातुविश्व
तः॥८२ $\frac{५१}{२९}$॥धूपार्पणमंत्रौ-धूरसिधूर्वधूर्वन्तंधूर्वतंय्योस्मान्धूर्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तितंधूर्व्वयंव्वयन्धूर्व्वीमः॥ देवानामसिव्वह्नितमᳬसस्नितमम्पप्रि
तमञ्जुष्टतमन्देवहूतमम् ॥ ८३ ६/१ ॥ ब्राह्मणोस्यमुखमासीद्बाहूरा
जन्यः कृतः ॥ ऊरूतदस्ययद्वैश्यः पद्भ्याᳩशूद्रोऽअजायत
॥ ८४ ११/३१ ॥ दीपार्पणमन्त्रौ-अग्निर्ज्योतिषाज्योतिष्मानुक्मो
वर्चसावर्च्चस्वान् ॥ सहस्रदाऽअसिसहस्रायत्वा ॥ ८५ ४०/१३ ॥
चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्च
प्प्राणश्चमुखादग्निरजायत ॥ ८६ १२/३१ ॥ नैवेद्यमन्त्रौ-अन्नपतेन्न

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्यनोदेह्यनमीवस्यंशुष्मिमणंः ॥ प्रप्प्रंदातारन्तारिषऽऊर्ज्जेन्नो
धेहिद्विपदेचतुष्पदे ॥ ८७ $\frac{३}{११}$ ॥ नाभ्याऽआसीदुन्तरिक्षᳮ
शीर्ष्णोद्यौःसमंवर्त्तत ॥ पुद्भ्याम्भूमिर्द्दिशᳮश्रोत्रात्तथांलोकाँ
२ऽअंकल्प्पयन् ॥ ८८ $\frac{१२}{३१}$ ॥ ताम्बूलार्पणमन्त्रः-उतस्म्मास्यद्द्र
वंतस्तुरण्यतःपुर्ण्णन्नवेरनुवातिप्प्रगुर्द्धिनंः ॥ श्येनस्येवद्धजंतोऽ
अङ्कुसम्परिंदधिक्क्रावण्णंःसुहोर्ज्जातरिंत्रतᳮस्वाहा ॥ ८९ $\frac{१५}{२}$ ॥
फलार्पणमन्त्रः -याᳮफलिनीर्य्याऽअंफलाऽअंपुष्पायाश्चंपु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

षिप्पणीः ॥ बृहस्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳहꣳसः ॥ ९० ९/१२ ॥
दक्षिणार्पणमन्त्रौ-यद्दत्तंय्यत्परादानंय्यत्पूर्तंय्याश्च दक्षिणाः ॥
तदग्निर्वैश्वकर्म्मणः स्वर्द्देवेषुनोदधत् ॥ ९१ ६४/१८ ॥ हिरण्यगर्भः
समवर्त्तताग्ग्रेभूतस्यजातः पतिरेकऽआसीत् ॥ सदाधारपृथिवी
न्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम ॥ ९२ ४/१३ ॥ नीराजन
मन्त्राः-येदेवासोदिव्येकादशस्त्थपृथिव्यामध्ध्येकादशस्त्थ॥ अ
प्सुक्षितोमहिनैकादशस्त्थतेदेवासोयज्ञमिमञ्जुषद्ध्वम् ॥ ९३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं० १९/७ ॥ आरांत्रिपार्थिवꣳरजःपितुरंप्प्रायिधामंभिः॥ दिवꣳसदांꣳ सं०
॥ १५ ॥ सिबृहतीव्वितिष्ठसऽआत्त्वेषंव्वर्त्ततेतमः॥ १४ ३२/३४ ॥ इदꣳहविः
प्प्रजननंम्मेऽअस्तुदशवीरꣳसर्व्वगणꣳस्वस्तये ॥ आत्मसनि
प्प्रजासनिपशुसनिलोकसन्न्यभयसनि ॥ अग्निःप्प्रजाम्बहु
लाम्मेकरोत्वन्नम्पयोरेतोऽअस्म्मासुधत्त ॥ १५ ४८/१९ ॥ मन्त्रपु
ष्पाञ्जलिमन्त्राः-गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वा
प्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम॥ ॥ १६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आहमजानिगर्भधमात्वमजासिगर्भधम् ॥ १६ $\frac{१९}{२३}$ ॥
श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्वि
नौव्यात्तम् ॥ इष्णन्निषाणामुम्मइषाणसर्वलोकम्मइषाण
॥ १७ $\frac{२२}{३१}$ ॥ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥ स
संस्त्यश्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ॥ १८ $\frac{१८}{२३}$ ॥ तन्त्वा
ऽएतमनुजोषम्भराम्म्येषनेत्वदपचेतयाताऽअग्नेश्प्रियम्पा-
थोपीतम् ॥ संस्रवभागास्स्थेषाबृहन्तःप्रस्तरेष्ठाःपरिधेया

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्श्वदेवाः ॥ ९९ १७।१८/२ ॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्श्वानर
मृतऽआजातमग्निम्॥ कविᳪसम्राजमतिथिञ्जनानामासन्नापा
त्रञ्जनयन्तदेवाः ॥ १०० ८/३२ ॥ प्प्रोह्यमाणᳪसोमऽआगतोव्वरुणऽ
आसन्द्यामासन्नोग्ग्निराग्नीध्रऽइन्द्रोहविर्द्धानेथर्वोपावह्रियमा
णोव्विश्श्वेदेवाः॥ १०१ ५६/८ ॥व्विश्श्वेदेवाऽअᳪशुषुन्न्युप्तोव्विष्ण्णुराप्प्री
तपाऽआप्प्याय्यमानोयमःसूयमानोव्विष्ण्णुःसम्भ्रियमाणो
वायुःपूयमानᳪशुक्रःपूतःशुक्रःक्षीरश्रीर्म्मन्थीसक्तुश्रीर्व्विश्श्वे ॥१६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवाः ॥ १०२ ५७/८ ॥ पितेवैधिसूनवऽआसुशेवास्वावेशात

न्वाऽसंविशस्वाश्विनाद्ध्वर्यूसादयतामिहत्वा पृथिव्याःपुरी

षमस्यप्सोनामतान्त्वाविश्वेऽअभिगृणन्तुदेवाः॥ १०३ ३१४/१४॥

षोडशीस्तोमऽओजोद्रविणञ्चतुश्चत्वारिᳪशस्तोमोवर्चोद्रवि

णम् ॥ अग्नेःपुरीषमस्यप्सोनामतान्त्वाविश्वेऽअभिगृणन्तु

देवाः ॥ १०४ ३/१५ ॥ समिद्धेऽअग्नावधिमामहानऽउक्थपत्रऽ

ईड्योगृभीतः ॥ तप्तङ्घर्म्मम्परिगृह्यायजन्तोर्ज्जायद्यज्ञमयंज

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं० न्तदेवाः ॥ १०५ ५५/१७ ॥ यस्येमाःप्प्रदिशोयस्यंबाहूकस्म्मैंदे सं०
॥ १७॥ वायंहविषांव्विधेम ॥ सऽआत्मदाबंलदायस्यव्विश्श्वंऽउपासं
तेप्प्रशिषंयस्यदेवाः ॥ १०६ १२।१३/२५ ॥ अनागास्त्वन्नोऽअदितिः
कृणोतुक्षत्त्रन्नोऽअश्श्वोव्वनताᳪंहविष्म्मान् ॥ इमानुकम्भुवं
नासीषधामेन्द्रंश्श्चव्विश्श्वेचदेवाः ॥ १०७ ४५।४६/२५ ॥ बृहंस्प्पतेस
वितर्बोधयैनᳪंसᳪंशितञ्चित्सन्तराᳪंसᳪंशिशाधि ॥ व्वर्द्धयैनम्म
हतेसौभंगायव्विश्श्वंऽएनमनुंमदन्तुदेवाः ॥ १०८ ८/२७ ॥ प्रजा ॥ १७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पतिस्तपसावावृधानःसद्योजातोदधिषेयज्ञमग्ने ॥ स्वाहाकृतेन
हविषापुरोगायाहिसाध्याहविरदन्तुदेवाः ॥ १०९ ११/२२ ॥ सद्यो
जातोऽव्यमिमीतयज्ञमग्निर्देवानामभवत्पुरोगाः ॥ अस्यहोतुः
प्रदिश्यृतस्यंवाचिस्वाहाकृतंहविरदन्तुदेवाः ॥ ११० ३६/२२ ॥
अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः ॥ यःशंस
तेस्तुवतेधायिपज्रऽइन्द्रज्येष्ठाऽअस्माँ २ अवन्तुदेवाः
॥ १११ ५०/३३ ॥ नहिस्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतार

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुग्नेः॥एमैनमवृधन्नमृताऽअमर्त्यैवैश्वानुरङ्क्षैत्रजित्यायदेवाः
॥ ११२ ६०/३३ ॥ युज्ञेनयुज्ञमयजन्तदेवास्तानिधर्म्माणिप्प्रथमा
न्यासन्॥ तेहुनाकम्महिमानः सचन्तयत्रपूर्वेसाद्ध्याःसन्ति
देवाः॥ ११३ १६/३१ ॥ ॐराजाधिराजायप्रसह्यसाहिने। नमोवु
यंवैश्रवणोयंकुर्महे। समेकामान्कामकामायमह्यं। कामेश्व
रोवैश्रवणोददातु। कुबेरायवैश्रवणाय। महाराजायनमः॥ ॐ
स्वस्ति। साम्राज्यंभौज्यंस्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमाहा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राज्यमाधिपत्यमयंसमन्तपर्यायीस्यात्सार्वभौमःसार्वायुषआ
न्तादापरार्धात् पृथिव्यैसमुद्रपर्यन्तायाएकराडितितदप्येषश्लो
कोऽभिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे । आविक्षित
स्यकामप्रेर्विश्वेदेवाःसभासदइति ॥ विश्वतश्चक्षुरुतविश्वतोमु
खोविश्वतोबाहुरुतविश्वतस्पात् ॥ सम्बाहुभ्यान्धमतिसम्प
तत्रैर्द्यावाभूमीजनयन्देवएकः॥ ११४ १९/१७ ॥प्रदक्षिणामन्त्रः-
सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः॥देवायद्यज्ञन्तन्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाऽअबध्नन्त्पुरुरवम्पुशुम् ॥ ११५ १५/३१ ॥ भूमिस्पर्शमन्त्रः- मुहीद्यौःपृ
थिवीचंनऽइमंय्युज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः ११६ ३२/८
यवप्रक्षेपमन्त्रः—ओषधयुःसमंवदन्तुसोमेनसुहराज्ञा ॥ यस्मै
कृणोतिब्राह्मुणस्तःराजन्पारयामसि ॥ ११७ ९६/१२ ॥ कलशस्थाप
नमन्त्रः—आजिंघ्रकुलशम्मुह्यात्वाविशुन्त्विन्दंवः ॥ पुनंरूर्ज्जा
निवर्तस्वसानंः सुहस्रन्धुक्ष्वोरुधारापयंस्वतीपुनम्मीविशताद्र
यिः ॥ ११८ ४२/८ ॥ जलपूरणमन्त्रः—वरुंणस्योत्तम्भंनमसिवरुं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

णस्यस्कम्भसर्ज्जनीस्थोव्वरुणस्यऽऋतसदंन्यसिव्वरुणस्यऽऋत
सदंनमसिव्वरुणस्यऽऋतसदंनमासींद ॥ ११८$\frac{३६}{४}$ ॥ गन्धप्रक्षेप
मन्त्रः—त्वाङ्गंधर्वा० ॥ ११९$\frac{९८}{१२}$ ॥ धान्यप्रक्षेपमन्त्रः—धान्यमसि
धिनुहिदेवान्प्राणायंत्त्वोदानायंत्त्वाव्यानायंत्वा ॥ दीर्ग्घांमनु
प्रसितिमायुषेधान्देवोवः सविताहिरंण्यपाणिः प्प्रतिगृब्भ्णात्व
च्छिद्रेणपाणिनाचक्षुषेत्वामहीनाम्पयोसि ॥ १२०$\frac{२०}{१}$ ॥ सर्वौ
षधिप्रक्षेपमन्त्रः—याऽओषधीः पूर्व्वाजातादेवेब्भ्यस्त्रियुगम्पुरा ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मनैनुबभ्रूणांमहश्शतन्धामांनिसप्तचं ॥ १२१$\frac{७५}{१२}$ ॥ दूर्वाप्रक्षे
पमन्त्रः—काण्डात्काण्डात्प्र० ॥ १२२$\frac{२०}{१३}$ ॥ पञ्चपल्लवप्रक्षेपमन्त्रः—
अश्वत्थेवोंनिषदंनम्पर्णेवोंवसतिष्कृता ॥ गोभाजइत्किलासथ
यत्सनवथपुरुषम् ॥ १२३$\frac{७९}{१२}$ ॥ सप्तमृद्प्रक्षेपमन्त्रः—स्योनापृथि
विनो० ॥ १२४$\frac{१३}{३६}$ ॥ फलप्रक्षेपमन्त्रः—याःफलिनीर्या० ॥ १२५$\frac{८२}{१२}$ ॥
पञ्चरत्नप्रक्षेपमन्त्रः—परिवाजपतिःकविरग्निर्हव्यान्यक्रमीत् ॥
दधद्रत्नानिदाशुषे ॥ १२६$\frac{२५}{११}$ ॥ हिरण्यप्रक्षेपमन्त्रः—हिरण्यग

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्भᳪसमं०॥ १२७$\frac{४}{१३}$ ॥ सूत्रवेष्टनमन्त्रौ—युवासुवासाःपरिवीत०
पा० गृ० का०२ कं०२ मं०९ (अनुक्रममन्त्र १२८) सुजा
तोज्ज्योतिषा० ॥ १२९$\frac{४०}{११}$ ॥ पूर्णपात्रनिधानमन्त्रः—पूर्णादर्वि
परापतसुपूर्णापुनरापत ॥ वस्नेवविक्रीणावहाऽइषमूर्जᳪशत
तक्रतो ॥ १३०$\frac{४९}{३}$ ॥ वरुणावाहनमन्त्रः—तत्त्वायामिब्रह्मणा०
॥ १३१$\frac{४९}{१८}$ ॥ प्रतिष्ठापनमन्त्रः—मनोजूतिर्जुषता० ॥ १३२$\frac{१३}{२}$ ॥
दीर्घायुष्यब्रुवणमन्त्राः—त्रीणिपदाविचक्रमेविष्णुर्गोपाऽअदा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भ्यः ॥ अतोधर्म्माणिधारयन् ॥ १३३ ४३/३४ ॥ त्रीणितऽआहुर्दिवि
विबन्धनानित्रीण्यप्सुत्रीण्यंतःसमुद्रे ॥उतेवमेवरुणश्छन्त्स्यर्वन्
न्यत्रातऽआहुःपरमञ्जनित्रम् ॥ १३४ १५/२२ ॥ त्रयादेवाऽएकादश
त्रयस्त्रिंशाःसुराधसः ॥ बृहस्पतिपुरोहितादेवस्यसवितुःसवे ॥
देवादेवैरवन्तुमा ॥ १३५ ११/२० ॥आशीर्वादमन्त्राः—भद्रंकर्णेभिः
शृणुयाम० ॥ १३६ २१/२५ ॥ देवानाम्भद्रा० ॥ १३७ १५/२५ ॥ दीर्घायुस्तऽ
ओषधेखनितायस्मैचत्वाखनाम्म्यहम् ॥ अथोत्वन्दीर्घायु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भूत्त्वाशतवल्शाविरोहतात् ॥ १३८$\frac{१००}{१२}$ ॥ ऋक्-द्रविणो
दाद्द्रविणसस्तुरस्यद्रविणोदाःसनरस्यप्रयंसत् ॥ द्रविणोदावी
रवतीमिषंनोद्रविणोदारांसतेदीर्घमायुः ॥ अष्टक १$\frac{४}{७}$ ॥ (मन्त्र
१३९) यजुः-द्रविणोदाःपिपीषतिजुहोतप्रचतिष्ठत ॥ ने
ष्ट्राहतुभिरिष्यत ॥ १४०$\frac{२२}{२६}$ ॥ साम-देवो २ वो २ द्रवि
णोदाः। पूर्णांविविष्ट्वासिचं । उद्वा१सिंचा२ । ध्वमुपवापृणध्वं ।
आदिद्वोदे २ । वओहतें । ईडा २३ भा ३४३ । ओ २३४५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 ई । डा ॥ वेयगानस्यद्वितीयप्रपाठकस्यप्रथमार्द्धंसाम २४ ॥
 (मन्त्र १४१) अथवर्णः—धातारातिःसवितेदंजुषंताम्प्रजा
पतिर्निधिपतिर्नोअग्निः ॥ त्वष्टाविष्णुःप्रजयांसंरराणोयजमा
नायद्रविणंदधातु ॥ ७$\frac{१०}{३}$ ॥ (मन्त्र१४२) ऋक्—सवितापश्चा
तात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ॥ सवितानः
सुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः ॥ ७$\frac{११}{८}$ ॥ मं. १४३ यजुः-
सविताऽत्त्वासवानांᳫं सुवतामग्निर्गृहपतीनांᳫं सोमोवनस्पती

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाम् ॥ बृहस्पतिर्वाचऽइन्द्रोज्यैष्ठ्यायरुद्रःपशुभ्योमित्रःस
त्त्योव्वरुणोधर्म्मपतीनाम् ॥ ३९/६ ॥ १४४ ॥ साम—ऊर्द्ध्वऊषुणा ३
ऊता२३४याई । तिष्ठादेवोनसविता । ऊर्द्ध्वोवा२३जा । स्या
सनिता । यादंजिभिरेः । वाघाद्भीरेः । वीवी२ह्वयामा२३हा
३४३ई । उ२३४५ई । डा ॥ वेयगानस्यद्वितीयप्रपाठकस्यप्रथ
मार्द्धेसाम २६ ॥ (मन्त्र १४५) अथर्वणः—अभयंद्यावापृथि
वीइहास्तुनोभयंसोमःसवितानःकृणोतु ॥ अभयन्नोस्तुर्वा१ऽन्त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं० रिक्षंसप्तऋषीणांचंहुविषाभंयन्नोऽस्तु ॥ ६$\frac{१}{२०}$ ॥ (मन्त्र १४६) स०
॥ २३ ॥ ऋक्-नवोंनवोभवतिजायंमानोह्नांकेतुरुषसांमेत्यग्रं ॥ भा
गंदेवेभ्योविदंधात्यायन्प्रचंद्रमांस्तिरतेदीर्घमायुंः॥ ८$\frac{२३}{३}$॥ (मन्त्र
१४७) यजुः-नतद्रक्षांॐसिनपिंशाचास्तंरन्तिदेवानामो
जंः प्प्रथमजॐह्येतत् ॥ योबिभर्तिंदाक्षायणॐहिरंण्यॐसदेवेषु
कृणुतेदीर्घमायुंॐसमंनुष्येषुकृणुतेदीर्घमायुंः ॥ १४८$\frac{५१}{३४}$ ॥
साम-चंद्रमाआउवा । प्सुवान्ताराउवा । सुपर्णो धाउ ॥ २३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वा । वतेंदिवि । न वोंहिरांउवा । ण्यनाइमायाउवा । पदंविं दाउवा । तिंविद्युताः । वित्तंमाआंउवा । स्यरोंदा २३ सा ३४३ इ । ओं २३४५ई । डा ॥ वेयगानस्यएकादशप्रपाठकस्यप्रथमार्द्धेसाम ३१ (१४९) अथर्वणः—नैनंरक्षांसिनपिशाचाःसंहन्ते देवानामोजःप्रथमजंह्ये३तत् ॥ योबिभर्तिदाक्षायणंहिरंण्यंस जीवेषुकृणुतेदीर्घमायुः ॥ १ २/३५ ॥ (१५०) अहोरात्राभ्यांनक्षत्रेभ्यःसूर्याचंद्रमसाभ्याम् ॥ भद्राहमस्मभ्यंराजंशकंधूमत्वंकृधि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ ६ ६/६ ॥१५१॥ऋक्-उच्चादिविदाक्षिणावंतोऽअस्थुर्येऽअंश्वदाःस
हतेसूर्यैण ॥ हिरण्यदाऽअंमृतत्वंभंजन्तेवासोदाःसौमप्रतिरंतऽ
आयुः॥८ ३/६ (१५२)यजुः-उच्चातेंजातमन्धंसोदिविसद्भूम्म्याद
दे॥उग्रंश्शर्म्ममहिश्रवं॥१५३ १६/२६॥ साम-उच्चाता ३ ईजातमं
धसाःदिवाई ।सा१द्भूर। मिया२ ३दददाई। उग्रांशम्र्मा । महा
२ ३ईश्रवाउ। वां ३। स्तौषे२ ३४५॥ वेयगानस्य द्वादशप्रपाठ
कस्य द्वितीयार्द्धं साम १३॥ (१५४)॥ इतिसामवेदमन्त्रः॥ ॥२४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथर्वण:—उद्यापतंतमरुणंसुपर्णंमध्येदिवस्तरणिंभ्राजमानम्॥
पश्यामत्वासवितारंमाहुरजंस्रंज्योतिर्यदंविंददत्रिः ॥ १३ $\frac{२६}{२}$ ॥
(१५५) उच्चैर्घोषोदुंदुभि:सत्वनायन्वानस्पत्य:संभृतउस्रियाभि: ॥
वाचंक्षुणुवानोदमयंन्त्सपत्नांन्सिंहइवजेष्यन्नभितंस्तनीहि ॥ ५ $\frac{१}{२०}$ ॥
(१५६) ऋक्—शन्नः कनिक्रदद्देवःपर्ज्जन्योअभिवर्षतु॥शन्नोद्यावा
पृथिवीशंप्रजाभ्यःशन्नंएधिद्विपदेशंचतुष्पदे ॥ ऋ० ब्र० शान्तिपा
ठेपरिशिष्टमंत्र ८ (१५७) यजु:—निकामेनिकामेनःपर्ज्जन्योवर्षतु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

फलंवत्योन ऽओषंधयः पच्यन्तांयोगक्षेमोनंः कल्पताम् ॥ १५८ २२/२२ ॥

ब्राह्मणम्——निकामेनिकामेनः पर्ज्जन्योवर्षत्वितिनिकामेनिकामेवै तत्रपर्ज्जन्योव्वर्षतियत्रैतेनयज्ञेनयजन्तेफलवत्योनऽओषधयः पच्यन्तामितिफलवत्योवैतत्रौषधयः पच्यन्तेयत्रैतेनयज्ञेनयजन्तेयोगक्षेमोनःकल्पतामितियोगक्षेमोवैतत्रकल्पतेयत्रैतेनयज्ञेनयजन्तेतस्माद्यत्रैतेनयज्ञेनयजन्तेकल्प्तःप्रजानांयोगक्षेमोभवति (१५९) ॥

साम—त्वष्टा ३४। नो दैवियंवचाः। पर्जन्योब्रह्मणस्पा २३ तीः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुत्रैर्भ्रातृभिरदितिर्नुपातू २३ नाः। दुष्टारा २३ न्त्रा। मणंवा २३ चा ३४३ :। ओ २३४५ ई। डा॥ वेयगानस्यअष्टमप्रपाठकस्यप्रथमार्द्धस्यसाम २० ॥ १६० ॥ अथर्वणः—गणास्त्वोपगायन्तुमारुताःपर्जन्यघोषिणः पृथक् ॥ सर्गावर्षस्यवर्षतोवर्षन्तुपृथिवीमनु ॥ ४$\frac{४}{१६}$ (१६१)॥ त्वष्टांमेदैव्यंवचःपर्जन्योब्रह्मणस्पतिः॥ पुत्रैर्भ्रातृभिरदितिर्नुपातुनोदुष्टरंत्रायमाणंसहः ६$\frac{१}{४}$॥ (१६२) ऋक्—उद्गातेवशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि ॥ वृषेववाजीशि

उ० मं० शुंमतीरुपीत्यांसर्वतोनःशकुनेभद्रमावंदविश्वतोनःशकुनेपुण्यमावंद स०

॥ २६ ॥ ॥ २ $\frac{१२}{८}$ ॥ (१६३) ॥ यजुः--पुनन्तुमादेवजनाःपुनन्तुमनसाधियः ॥ पुनन्तुविश्वाभूतानिजातवेदःपुनीहिमा ॥ १६४ $\frac{३९}{१९}$ ॥ ब्राह्मणम्--

सद्यःकामयेतमहत्प्राप्नुयामित्युदगयनऽआपूर्यमाणपक्षेपुण्याहेद्वाद

शाहमुपसद्व्रतीभूत्वौदुंबरेकंसेचमसेवासर्वौषधम्फलानीतिसम्भृत्य

परिसमुह्यपरिलिप्याग्निमुपसमाधायावृताज्यंसंस्कृत्यपुंसानक्ष

त्रेणमन्थंसन्नीयजुहोति ॥ १६५ ॥ सामम--पुनानःसोमा३धारा ॥ २६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२३४ या। आपोवसानोअर्षस्यारत्नधायोनिमृतस्यसा २ईद् साई।
ओहा३उवा। उत्सोदेवोहिरा २३ हाई। ओह्वा ३ उवा। ण्यया।
ओ। ३ होवा। हो ५ ई। डा॥ वेयगानस्यचतुर्दशप्रपाठकस्यप्रथ
मार्द्धेसाम ३५ (१६६) अथर्वण:--पुनन्तुमादेवजना:पुनन्तुमन
वोधिया॥ पुनन्तुविश्वाभूतानिपवमान:पुनातुमा॥ ६ १/१८ ॥१६७॥
ऋक्--अपा:सोमस्तमिन्द्रप्रयाहिकल्याणीर्जायासुरणंगृहेते॥ यत्रा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत ॥ ३ $\frac{२०}{३}$ ॥ (१६८)

यजुः--यथेमां वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्यांᳪ शूद्राय चार्याय च स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु ॥ $\frac{२}{२६}$ (१६९)

ब्राह्मणम्--अथाध्वर्युः प्रतिगरो रात्सुरिमे यजमाना भद्रमेभ्यो यजमानेभ्यो भूदिति कल्याणमेवैतन्मानुष्यै वाचो वदति ॥ १७० ॥ साम--

काँऽ५ या । नश्वा ३ इत्रा ३ आभूवात् । उ । तीस दावृध स्सं । ॥ २७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

खा। ओ३ हो हाइ। कया २३ शचा ई। ष्ठयौ हो ३। हुम्मा १२।
वा॑ऽ २ तो ३५ हाइ॥ वेयगानस्यपंचमप्रपाठकस्यप्रथमार्द्धेसाम
२५ (१७१)॥ अथर्वण:--विश्वंजित्कल्याण्यैमापरिंदेहि॥ कल्या
णिद्विपाच्चसर्वन्नोरक्षचतुंष्पाद्यच्चंनः स्वम्॥ ६ $\frac{२}{१०७}$ (१७२)॥ ऋक्-
ऋध्यामस्तोमंसनुयामवाजमानोमंत्रंसरथेहोपयातं॥ यशोनपक्कंमधु
गोष्वंतराभूतांशोऽअश्विनोःकाममप्राः॥ ८ $\frac{२}{६}$॥ (१७३) यजुः--
सत्रस्यऽऋाद्धिरस्यगन्मज्योतिरमृताऽअभूम॥ द्विवंम्पृथिव्याऽअ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं० ॥ २८ ॥

द्यारुहामाविदामदेवान्त्स्वर्ज्योतिः ॥ १७४ ॥ ब्राह्मणम्--तऽ स०

उत्तरस्यहविर्द्धानस्यजघन्यायाङ्कुवर्याᳪंसामाभिगायन्तिसत्रस्यऽ

ऋद्धिरितिराद्धिमेवैतदभ्युत्तिष्ठंत्युत्तरवेदेर्वौत्तरायाᳪंश्रोणावितरंतु

ऋतूत्तरम् ॥ १७५ ॥ साम--औ हो वा औ हो वा औ हो ३ वा ।

अगन्म ज्यो तिः । अगन्म ज्योतिः । अगन्मज्यो तिः । अमृताअ

भूम । अमृता अभूम । अमृता अ भू मा । तरिक्षंपृथिव्याअध्यारु ॥ २८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हां मां। तरिक्षंपृथिव्याँअध्यांरु हां मां। तरिक्षंपृथिव्याँअध्यांरुहांम।
दिवमन्तरिक्षां दध्यांरु हां म। दिवमन्तरिक्षांदध्यांरु हांम। दिवम
न्तरिक्षा दध्या रुहाम। अविदामदे वा न्। अविदामदे वा न्। अवि
दामदे वान्। समुदे वै रगन्महि। समु दे वै रगन्महि। समु दे वै
रगन्महि। औ हो वा। औ हो वा। औ हो ३ वा। सुवर्ज्यो ती २ ३
४ ५ः॥ आरण्यगानस्यचतुर्थप्रपाठकस्यप्रथमार्द्धेसाम ४॥(१७६)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ २९ ॥

अथर्वण:--ऋधंङ्मंत्रोयोनिंयआंबभूवामृतांसुर्वर्द्धमानःसुजन्मां ॥
अदंब्धासुर्भ्राजंमानोहैवत्रितोधर्त्तादांधारत्रीणि ॥ ५$\frac{१}{१}$ ॥ (१७७)
ऋक्--स्वस्तिरिद्धिप्रपंथेश्रेष्ठारेक्णस्वत्याभियावाममेति ॥ सानोऽअ
मासोऽअरंणेनिपांतुस्वावेशाभंवतुदेवगोपा ॥ ८$\frac{९}{२}$ ॥ (१७८) ॥
यजुः--स्वस्तिनऽइन्द्रोंवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः ॥ स्वस्ति
नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ १७९ $\frac{१९}{२५}$ ॥ ब्राह्म
णम्--गातुन्यज्ञायगातुन्यज्ञपतयऽइतिगातुंह्येषयज्ञायेच्छतिगा

॥ २९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तुभ्यञ्ज्ञपतयेसोयज्ञस्यसᳫंस्थान्दैवीस्वस्तिरस्तुनःस्वस्तिर्मानुष्येभ्य
ऽइतिस्वस्तिनोदेवत्रास्तुस्वस्तिर्मानुष्यत्रेत्येवैतदाहोर्ध्वंजिगातुभेष
जमित्यूर्ध्वंनोयज्ञंदेवलोकन्नयत्वित्येवैतदाहशन्नोऽअस्तुद्विप
देशञ्चतुष्पदऽइत्येतावद्वाऽइदᳫंसर्वंयावद्द्विपाच्चैवचतुष्पाच्चतस्माऽ
एवैतद्यज्ञस्यसᳫंस्थांगत्वाशंकरोतितस्मादाहशन्नोऽअस्तुद्विपदेशञ्च

तुष्पदे ॥१८०॥ साम--त्रातारमिन्द्रमविता। रमि २३ न्द्राम्। ह
वे हवे सुहवᳫंशू। र मी २३ न्द्राम्। हुवाइ नुशक्रंपुरुहू। तमी २३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं न्द्राम् । इ द॒ ꣳ ह । वाइः । म घ वा । वा ३४३ इ । तू ३ वा ५ इन्द्रा सं०

॥ ३० ॥ ६५६ः ॥ वेयगानस्यनवमप्रपाठकस्यप्रथमार्द्धेसाम ३ ॥ १८१ ॥

अथर्वणः-स्वस्तिमात्रउतपित्रेणोअस्तुस्वस्तिगोभ्योजगतेपुरुषेभ्यः।

विश्वंसुभूतंसुविदत्रंनोअस्तुज्योगेवदृंशेमसूर्यम् ॥ १ ४/२१ ॥ (१८२)

ऋक्-श्रियेजातःश्रियआनिरियाय श्रियंवयो जरितृभ्योदधाति ॥

श्रियंवसानाऽअमृतत्वमायन्भवंतिसत्यासमिथामितद्रौ॥(१८३)

ऋग्वेदसंहितायां अष्टक७अध्याय ४ मंत्र४ ॥ (मण्डल ९।५।१०)॥ ॥ ३० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मनंस्ँकाममाकूतिंवाचँसत्यमंशीय॥ पशूनाँरूपमन्नंस्यरसोय-
शःश्रीःश्रयतांम्मयिस्वाहा॥ १८४ ४/३९॥ ब्राह्मणम्--तेनोहततऽईजेद
क्षःपार्वतस्तऽइमेप्येतर्हिदाक्षायणाराज्यमिवैवप्राप्ताराज्यमिहवैव
प्राप्नोतियऽएवंविद्वानेतेनयज्ञेनयजन्तेतस्माद्वाऽएतेनयजेतसवाऽए
कैकऽएवानूचिनाहुं पुरोडाशोभवत्येतेनोहास्यासपत्नानुपबाधाश्री
र्भवति॥ १८५॥ आयन्तइवसूर्यं। विश्वा इदिन्द्रा। स्यभा
क्षाता। वासू निजा तो ज निमा। नियोजा १सा। प्रतिभागं नदीरधि

मः।प्रा २३ ती।भागांना ३ दा।हुं।धिमा ३ः।ओ २३४वा।है २ ३ ४ ५॥
॥ ३१ ॥ वेयगानस्यसप्तमप्रपाठकस्यद्वितीयार्द्धेसाम५॥(१८६)अथर्वणः—
एहयांतुवरुणःसोमोअग्निर्बृहस्पतिर्वसुभिरेहयांतु॥अस्याश्रियमुपसं
यांतसर्वंऽउग्रस्यचेतुःसंमनसःसजाताः६ $\frac{1}{36}$ ॥(१८७)॥ अभिषेकम-
न्त्राः--पयंःपृथिव्याम्पय०॥१८८॥ पञ्चनद्यःसरस्वती०।१८९।
वरुणस्योत्तम्भनमसि॥१९०॥पुनन्तुमादेवजनाः॥१९१॥ देवस्य ॥ ३१ ॥
त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांम्पूष्णोहस्ताभ्याम्॥सरस्वत्यै

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्वाचोयन्तुर्य्यन्त्रियैदधामिबृहुस्पतैष्टासाम्म्राज्ज्ययेनाभिषिञ्चाम्म्य
सौ ॥ १९२ $\frac{३०}{९}$ ॥ देवस्यंत्वासवितुःप्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो
हस्ताब्भ्याम्॥ सरस्वत्त्यैव्वाचोयन्तुर्य्यन्त्रेणाग्ग्नेःसाम्म्राज्ज्येनाभि
षिञ्चामि ॥ १९३ $\frac{३७}{१८}$ ॥ देवस्यंत्वासवितुःप्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पू
ष्णोहस्ताब्भ्याम्॥ अश्विनोर्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषि
ञ्चामिसरस्वत्यैभैषज्ज्येनव्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रिये
णबलायश्श्रियैयशसेभिषिञ्चामि ॥ १९४ $\frac{२}{२०}$ ॥ व्विश्वानिदेवसवितर्दु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ १९५$\frac{३}{३०}$ ॥ धामच्छदग्निरि
न्द्रोब्रह्मादेवोबृहस्पति÷ ॥ सचेतसोविश्वेदेवायज्ञम्प्रावन्तुनःशुभे
॥ १९६$\frac{७६}{१८}$ ॥ त्वंय्यविष्ठदाशुषोनॄँ᳘पाहिशृणुधीगिरं÷ ॥ रक्षातोकमु
तत्मना ॥ १९७$\frac{६२}{१३}$ ॥ अन्नपतेन्नस्य ॥ १९८ ॥ द्यौःशान्तिः ॥ १९९ ॥
यतोयतः ॥ २००$\frac{२२}{३६}$ ॥ श० ब्राह्मणमंत्राः—पालाशंभवतितेनब्राह्मणो
भिषिञ्चतिब्रह्मवैपलाशोब्रह्मणैवैनमेतदभिषिञ्चति ॥ २०१ ॥ औदुंब
रंभवतितेनस्वोभिषिञ्चत्यन्नंवाऽऊर्गुदुंबरऽऊर्ग्वैस्वंयावद्वैपुरुषस्यस्वं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भवतिनैवतावदशनायतितेनोर्कस्वंतस्मादौदुंबरेणस्वोभिषिञ्चति ॥ २०२ ॥ नैग्य्यग्रोधपादंभवतितेनामित्रोराजन्योभिषिञ्चतिपाद्भिर्वै न्यग्रोधंप्रतिष्ठितोमित्रेणवैराजन्यःप्रतिष्ठितस्तस्मान्नैग्य्यग्रोधपादे नामित्रोराजन्योभिषिश्चति ॥२०३॥ आश्वत्थंभवतितेनवैश्योभिषि श्चतिसयदेवादोश्वत्थेतिष्ठतऽइन्द्रोमरुतउपामंत्रयततस्मादाश्वत्थेन वैश्योभिषिश्चति ॥२०४॥ यद्वेवकल्पाञ्जुहोतिप्राणावैकल्पाऽअमृतमु वैप्राणाऽअमृतेनैवैनमेतदभिषिंचति ॥ सर्व्वेषांवाऽएषव्वेदानाᳪरसोय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं० त्सामसर्व्वेषामेवैनमेतद्देदानाᳪंरसेनाभिषिंचति ॥२०५॥ नीराजन- स०
॥ ३३ ॥ मंत्रः-अनाधृष्टापुरस्तादग्नेराधिपत्यऽआयुर्म्मेदाः पुत्रवतीदक्षिणत
ऽइन्द्रस्याधिपत्येप्रजाम्मेदाः सुखदापश्चाद्देवस्यसवितुराधिपत्येच
क्षुर्म्मेदाऽआश्श्रुतिरुत्तरतोधातुराधिपत्येरायस्पोषम्मेदाः ॥ विधृति
रुपरिष्टाद्बृहस्पतेराधिपत्यऽओजोमेदाविश्वाभ्योमानाष्ट्राभ्यं
स्पाहिमनोरश्वासि ॥२०६ १२/३७॥ भूमिपूजनमन्त्रः-भूरसिभूमिरस्यादि ॥ ३३ ॥
तिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री ॥ पृथिवींयच्छपृथिवीन्दृं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ह्पृथिवीम्माहिंसीः।२०७$\frac{१८}{१३}$॥कूर्मपूजनमन्त्रः--यस्यंकूर्मोगृहेहु
विस्तमंग्नेवर्द्धयात्वम्॥ तस्मैदेवाऽअधिब्ब्रुवन्नयञ्चब्ब्रह्मणस्पतिः
॥२०८$\frac{६२}{१७}$॥ अभ्रिग्रहणमंत्रः—देवस्यंत्वासवितुःप्प्रसवेश्विनोर्ब्बाहु
भ्यांम्पूष्णोहस्ताभ्याम्॥ आददेनारिरसि॥२०९$\frac{१}{३७}$॥ खननमन्त्रः--
मावोरिषत्खनितायस्मैचाहङ्खनामिवः॥ द्विपाच्चतुष्प्पादस्माकह
सर्व्वमस्त्वनातुरम्॥ २१०$\frac{९९}{१२}$॥ जलसेचनमन्त्रः--सिञ्चन्तिपरिषि-
ञ्चन्त्युत्सिञ्चन्तिपुनन्तिच ॥ सुरायैबब्भ्रवैमदेकिन्त्वोवदतिकिन्त्वः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं० ॥ २११ २८/२० ॥ यवनिक्षेपमन्त्रः—यवो॑सि य॒वया॒स्म्मद्द्वेषो॑ य॒वयारा॑तीः स०

॥ ३४ ॥ ॥ २१२ २६/६ ॥ स्तंभोच्छ्रयणमन्त्रः--उच्छ्र॑यस्व्वनस्प्पतऽऊ॒र्द्ध्वो॑मांपा॒

ह्यꣳहस॒ऽआस्यय॒ज्ञस्यो॒दृच॑ः ॥ २१३ १०/४ ॥ स्तम्भरोपणमंत्रः--ऊ॒र्द्ध्व

ऽऊ॒षुणऽऊ॒तये॒तिष्ठा॑दे॒वोनस॑वि॒ता ॥ ऊ॒र्द्ध्वोव्वाजस्य॒सनि॑ता॒यद॒ञ्जिभि॑

र्वा॒घद्भि॑र्व्विह्वया॑महे ॥ २१४ ४२/११ ॥ स्तम्भास्थिरीकरणमंत्रः--स्थि॒रोभ॑व

वीड्वङ्गऽआ॒शुर्भ॑वव्वा॒ज्यर्व्व॑न् ॥ पृ॒थुर्भ॑वसु॒षद॒स्त्वम॒ग्नेःपु॑री॒षवाह॑णः ॥ ३४ ॥

॥ २१५ ४४/११ ॥ शाखासुतैळारोपणमन्त्रः--व्वसोः॑पवि॒त्त्रम॑सिश॒तधा॑रं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्वसोः॑ पवित्र॑मसि सुहस्र॑धारम् ॥ देवस्त्वा॑ सविता पु॑नातु व्वसोः॑ पवित्रे॑
ण शुतधा॑रेण सुप्वा॒ कामं॑ धुक्षः॑ ।२१६ $\frac{३}{१}$ ॥ शाखासु सुगंधिद्रव्येणोद्वर्तन
मन्त्रः--आहँ॑रिव भोगैः॑ ॥ २१७ $\frac{६१}{२२}$ ॥ उष्णोदकेन शाखास्नपनमंत्रः-
निका॒मे निका॑मेनः॑ ० ॥ २१८ $\frac{२२}{२२}$ ॥ शाखासु दध्यक्षतप्रक्षेपमंत्रः--दुधि
क्राव्णो॑ ० २१९ $\frac{३२}{२३}$ ॥ शाखैकग्रहणमन्त्रः--या ऽओष॑धीः॑ ॥ २२० $\frac{३२}{२३}$
गौर्य्यावाहनमन्त्रौ--आयङ्गौः पृश्निर॑क्रमी॒दसं॑दन्मा॒तरं॒म्पुरः॑ ॥ पि॒तरं॑
ञ्च प्रयन्त्स्वः॑ ॥ २२१ $\frac{६}{३}$ ॥ अथवा--शर्म्म्या॒स्य वधूतं॒ रक्षो॒ऽवधूता॒ऽअरा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तयोदिॆत्यास्त्वग्गंसिप्प्रातित्वादिॆतिर्व्वैत्तु॥ अद्विंरासिव्वानस्प्पत्योग्रावा
सिपृथुबुंध्नꣳप्प्रातित्वादिॆत्यास्त्वग्ग्वेत्तु ॥ २२२$\frac{१४}{१}$ ॥ पद्मावाहनमन्त्रौ–
हिरंण्ण्यरूपाऽउषसोंव्विरोकऽउभाविन्द्राऽउदिॆथꣳसूर्य्यश्च ॥ आरो
हतंव्वरुणामित्रगर्तन्ततंश्चक्षाथामदितिन्दितिञ्चमित्रोसिव्वरुणोसि ॥
२२३$\frac{१६}{१०}$ ॥ पावकानꣳसरंस्वतीव्वाजेभिर्व्वाजिनींवती॥यज्ञंव्वष्टुधियाव्वं
सुꣳ ॥ २२४$\frac{८४}{२०}$ ॥ शच्यावाहनमन्त्रौ--कदाचनस्तरीरांसिनेन्द्रंसश्चसि
दाशुषे॥ उपोपेन्नुमंघवन्भूयऽइन्नुतेदानंन्देवस्यंपृच्च्यतऽआदित्येब्भ्यं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्त्वा ॥ २२५$\frac{२}{८}$ ॥ निवेशनꣳसङ्गमनोव्वसूनांव्विश्वारूपाभिचष्टेशचीभिः॥ देवऽइवसवितासत्त्यधर्म्मेन्द्रोनतस्त्थौसमरेपथीनाम् ॥ २२६ $\frac{६६}{१२}$॥ मेधावाहनमन्त्रः--मेधाम्मेवरुणोददातुमेधामग्निश्प्रजापतिः॥ मेधामिन्द्रश्चव्वायुश्चमेधान्धातादधातुमेस्वाहा ॥ २२७$\frac{१६}{३२}$ ॥ सावित्र्यावाहनमन्त्रौ--उपयामगृहीतोसिसावित्रोसिचनोधाश्चनोधाऽअसिचनोमयिधेहि ॥ जिन्वयज्ञञ्जिन्वयज्ञपतिम्भगायदेवायत्वासवित्रे ॥२२८$\frac{१}{८}$ ॥अथवा--सवितात्त्वासवानाꣳसुवतामग्निग्गृहपतीनाꣳसो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मोव्वनस्प्पतीनाम् ॥ बृहस्प्पतिर्व्वांचऽइन्द्रोज्ज्यैष्ठ्यांयरुद्रश्पशुब्भ्यो
मित्त्रश्सत्त्योव्वरुंणोधर्म्मंपतीनाम् ॥ २२९ ३९/९ ॥ विजयावाहनमन्त्रौ--
व्विज्ज्यन्धनुं÷कपर्द्दिनोव्विशंल्ल्योबाणंवाँ२उत ॥ अनैशन्नस्स्ययाऽइषं
वऽआभुरंस्यनिषङ्गधिश् ॥ २३० १०/१६ ॥ अथवा--प्राणायस्वाहांपानाय
स्वाहांव्यानायस्वाहां ॥ अम्बेऽअम्बिकेम्बांलिकेनमांनयतिकश्चन ॥
ससंस्त्यश्वकश्सुभंद्रिकाङ्काम्पीलवासिनीम् ॥ २३१ १८/२३ ॥ इति ॥ ॥ ३६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जयावाहनमन्त्रौ—यातेरुद्रशिवातनूरघोरापापकाशिनी॥तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि॥२३२$\frac{२}{१६}$॥ अथवा—बह्वीनाम्पिताबहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य॥इषुधिःसङ्काःपृतनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः॥२३३$\frac{४२}{२९}$॥देवसेनावाहनमन्त्रः—इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञःपुरऽएतुसोमः॥ देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्रम्॥२३४$\frac{४०}{१७}$॥ स्वधावाहनमन्त्रः—पितृभ्यःस्वधायिभ्यःस्वधानमः पितामहेभ्यःस्वधा

७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० म० यिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥ अ स०

॥ ३७ ॥ क्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरः पितरः शुन्धध्वम् ॥ २३५

३६/१९ ॥ स्वाहावाहनमन्त्रौ—स्वाहायज्ञंमनंसः स्वाहोरोरन्तरिक्षात्स्वाहा

द्यावापृथिवीभ्याᳪ स्वाहावातादारंभेस्वाहा ॥ २३६ ६/४ ॥ अथवा—

स्वाहाप्प्राणेभ्यः साधिपतिकेभ्यः ॥ पृथिव्यैस्वाहाग्नयेस्वाहान्तरि

क्षायस्वाहावायवेस्वाहा ॥ दिवेस्वाहासूर्य्यायस्वाहा ॥ २३७ १/३९ ॥ धृ ॥ ३७ ॥

त्यावाहनमन्त्रौ—धृष्टिरस्यपाग्नेऽअग्निमामादंजहिनिष्क्रव्यादंसे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धादेवयजंवह॥ ध्रुवमसिपृथिवीन्दृꣳहब्रह्मवनित्वाक्षत्रवनिसजात
वन्युपदधामिभ्रातृव्यस्यवधाय।२३८ $\frac{१७}{१}$॥ अथवा--भद्रङ्कर्णेभिः०
॥२३९ $\frac{२१}{२८}$॥ पुष्ट्यावाहनमन्त्रौ--त्वष्टातुरीपोऽअद्भुतऽइन्द्राग्नीपुष्टि
वर्द्धना॥ द्विपदाच्छन्दऽइन्द्रियमुक्षागौर्नवयोदधुः॥२४० $\frac{२०}{२१}$॥ अथ
वा--अङ्गान्यात्मन्भिषजातदश्विनात्मानमङ्गैःसमधात्सरस्वती।
इन्द्रस्यरूपꣳशतमानमायुश्चन्द्रेणज्योतिरमृतन्दधानाः॥२४१ $\frac{१३}{१९}$॥
तुष्ट्यावाहनमन्त्रौ--बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्रतु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदुस्म्मासुद्रविणन्धेहिचित्रम् ॥ २४२ $\frac{२}{२६}$ ॥ अथवा–जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्ग्गाणिविश्वानावेवसिन्धुंदुरितात्यग्निः॥ ॥२४३–॥कुलदेवतावाहनमन्त्रः--अम्बेऽअम्बिके० ॥२४४ $\frac{१८}{२३}$॥ वसोर्द्धाराकरणमन्त्रः--वसोःपवित्रमसिशतधारं० ॥२४५ $\frac{३}{१}$ ॥ श्र्याावाहनमन्त्रः--मनसःकाममाकूतिं० ॥ २४६ $\frac{४}{३९}$ ॥ लक्ष्म्यावाहनमन्त्रः--श्रीश्चतेलक्ष्मीश्च० ॥२४७ $\frac{२२}{३१}$॥ धृत्यावाहनमन्त्रः--इहरतिं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रिहरंमह्यमिहधृतिंरिहस्वधृंतिःस्वाहां॥उपसृजन्धरुणंम्मात्रेधरुणो
मातरन्धयंन्॥रायस्पोषंमस्म्मासुंदीधरत्स्वाहां॥२४८ $\frac{११}{८}$॥ मेधावा
हनमन्त्रः--मेधाम्मेव्वरुणो०॥२४९ $\frac{१६}{३२}$॥पुष्ट्यावाहनमन्त्रः--देवीजो
ष्ट्रीसरस्वत्याश्विनेन्द्रमवर्द्धयन्॥श्रोत्रन्नकर्णयोर्यशोजोष्ट्रीब्भ्या
न्दधुरिन्द्रियंव्वसुवनैव्वसुधेयस्यव्यन्तुयज॥२५० $\frac{११}{२१}$॥ श्रद्धावाहनम
न्त्रः--व्व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम्॥दक्षिणाश्श्रद्धा
माप्नोतिश्श्रद्धयासत्यमाप्प्यते॥२५१ $\frac{३०}{१९}$॥ सरस्वत्यावाहनमन्त्रः--

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उ० मं०

॥ ३९ ॥

स०

देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्द्धयन्। अस्पृक्षद्भारती दिवꣳ रुद्रै
र्यज्ञꣳ सरस्वतीडा वसुमती गृहान्वसुवने वसुधेयस्य व्यन्तु यज ॥ २५२
१८/२८ ॥ आयुष्यजपमन्त्राः—आयुष्यं वर्चस्यꣳ रायस्पोषमौद्भिदम् ॥
इदꣳ हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम् ॥ २५३ ५०/३४ ॥ न तद्रक्षाꣳ
सि० ॥ २५४ ५१/३४ ॥ यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुम
नस्यमानाः ॥ तन्म आबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथा ॥ ३९ ॥
सम् ॥ २५५ ५२/३४ ॥ पितृविसर्जनमन्त्रः--वाजेवाजेऽवत वाजिनो नो धने

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुविषाऽअमृताऽकृतज्ञाः। अस्यमद्धुं:पिबतमादयंद्धन्तूमायातपथि
भिर्द्देवयानैः॥ २५६ १८/६ ॥ पित्रनुव्रजनमन्त्रः--आमावाजंस्यप्रसवो
जंगम्म्यादेमेद्यावांपृथिवीव्विश्वरूपे॥ आमांगन्ताम्पितरांमातराचा
मासोमोऽअमृतत्वेनंगम्म्यात्॥२५७ १९/६॥ आचार्यवरणमन्त्रः--बृहस्प
तेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु।यद्दीदयच्छवसऽऋत
प्रजाततदस्मासुद्रविणन्धेहिचित्रम्॥ उपयामगृहीतोऽसिबृहस्पतंये
त्वैषतेयोनिर्बृहस्पतंयेत्वा॥ २५८ ३/२६ ॥ब्रह्मवरणमन्त्रः--ब्रह्मजज्ञानंप्रथ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मं पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यवि
ष्ठाः सतश्चयोनिमसतश्चविवः ॥२५९ ३/१३॥ सदस्यवरणमन्त्रः--सदसस्प
तिमद्भुतंप्रियमिन्द्रस्यकाम्यम्। सनिम्मेधामयासिषᳩस्वाहा ॥२६० १३/३२॥
ऋत्विक्वरणमन्त्रः--एतावद्रूपंयज्ञस्ययद्देवैर्ब्रह्मणाकृतम्॥ तदेतत्स
र्वमाप्नोतियज्ञेसौत्रामणीसुते ॥ २६१ ३१/१२ ॥ पत्नीकङ्कणबन्धनमन्त्रः--
तम्पत्नीभिरनुगच्छेमदेवाः पुत्रैर्भ्रातृभिरुतवाहिरण्यैः ॥ नाकङ्गृ
भ्णानाः सुकृतस्यलोकेतृतीयेपृष्ठेऽअधिरोचनेदिवः ॥२६२ ५०/१५॥ पत्न्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गव्येगोमयक्षेपणमन्त्रः--गन्धद्द्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम्॥
ईश्वरींसर्वभूतानान्तामिहोपह्वयेश्रियम् ॥ २६३॥ श्रीसूक्ते० ॥ पञ्चग
व्येक्षीरनिक्षेपमन्त्रः--आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यम्।
भवावाजस्यसङ्गथे ॥२६४ $\frac{११२}{१२}$॥ पञ्चगव्येआज्यक्षेपणमन्त्रः--तेजोसि
शुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामनाधृष्टन्देवयजनमसि
॥२६५ $\frac{३१}{१}$॥ अग्निस्थापनमन्त्रः--अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥
देवाँ २ऽआसादयादिह ॥२६६ $\frac{१७}{२२}$॥अग्निध्यानमन्त्रः--चत्वारिशृङ्गात्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

योऽअस्यपादाद्द्वेशीर्षेसप्तहस्तासोऽअस्य ॥ त्रिधाबद्धोवृषभोरोरवी
तिमहोदेवोमर्त्याँ२ऽआविवेश ॥२६७ ९१/१७॥ सूर्यावाहनमन्त्रः--आकृष्णे
नरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथे
नादेवोयातिभुवनानिपश्यन् ॥२६८ ४३/३३॥ चन्द्रावाहनमन्त्रः--इमन्देवा
ऽअसपत्नꣳसुवद्ध्वम्महतेक्षत्त्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्या
येन्द्रस्येन्द्रियाय ॥ इमममुष्ष्यपुत्रममुष्ष्यैपुत्रमस्यैविशऽएषवोमी
राजासोमोस्माकम्ब्राह्मणानाꣳराजा ॥२६९ १८/१०॥ भौमावाहनमन्त्रः--

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अ॒ग्निर्मू॒र्द्धा दि॒वः क॒कुत्पतिः॑ पृथि॒व्या ऽअ॒यम् ॥ अ॒पाᳬं रेता॑ᳬंसि जिन्वति ॥२७० $\frac{१२}{३}$ ॥ बुधावाहनमन्त्रः--उ॒द्बु॑ध्यस्वाग्ने॒ प्रति॑जागृहि त्वमि॑ष्टापू॒र्त्ते सᳬं सृ॑जेथाम॒यञ्च॑ ॥ अ॒स्मिन्त्स॒धस्थे॒ ऽअध्यु॑त्त॑रस्मि॒न्विश्वे॑ दे॒वा॒ यज॑मानश्च सीदत ॥२७१ $\frac{१४}{१५}$ ॥ शुक्रावाहनमन्त्रः--अन्ना॑त्परि॒स्रुतो॒ रस॒म्ब्रह्म॑णा॒ व्य॑पिबत्क्ष॒त्रम्पयः॒ सोमं॑ प्र॒जाप॑तिः ॥ ऋ॒तेन॑ स॒त्यमि॑न्द्रि॒यं वि॒पान॑ᳬं शु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒ऽमृत॒म्मधु॑ ॥ २७२ $\frac{७५}{१९}$ ॥ केत्वावाहनमन्त्रः--के॒तुङ्कृ॒ण्वन्न॑के॒तवे॒ पेशो॑ मर्य्या ऽअपे॒शसे॑ ॥ सम्॒ुषद्भि॑

 रजायथा॑ः॥२७३ ३७/२९॥ ईश्वरावाहनमं० -त्र्यंम्बकंय्यजामहेसुगन्धिम्पु
 ष्टिवर्द्धनम्॥ उर्व्वारुकमिंवबन्धंनान्मृत्योर्मुक्षीयमामृतात् ॥२७४ ६०/३॥
स्कन्दावाहनमं०-यद॒क्रंन्द॒ः प्प्रथमञ्जायंमानऽउद्यन्त्संमुद्द्रादुतवापु
रीषात्॥श्येनस्यंपक्षाहंरिणस्यंबाहूऽउंपस्तुत्यम्महिंजातन्तेंऽअर्व्वन्॥
॥ २७७ १२/२९ ॥ विष्णवा० मन्त्रौ--व्विष्णोंरराटंमसिव्विष्णोःश्नप्त्रेंस्थोव्वि
ष्णोःस्यूरंसिव्विष्णोंर्ध्रुवोंसि॥ वैष्णवमंसिव्विष्णंवेत्वा ॥२७८ २१/५॥ इदं
व्विष्णुर्व्विचंक्रमेत्रेधानिदंधेपदम्॥ समूंढमस्यपाॐसुरेस्वाहा ॥ १५/५॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्रह्मावाहनमन्त्रः— आब्ब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेरा
जन्न्यः शूरऽइषव्व्योऽतिव्याधीमहारथोजायतान्दोग्ध्रीधेनुर्व्वोढानड्वा
नाशुः सप्तिः पुरन्धिर्य्योषाजिष्णूरथेष्ठाः सभेयो युवास्ययजमानस्य
व्वीरोजायतान्निकामे निकामेनः पर्ज्जन्न्योव्वर्षतुफलवत्योनऽओषध
यः पच्यन्तांय्योगक्षेमोनः कल्पताम्॥ २८० २२/२२॥ इन्द्रावाहनमन्त्रौ--
सजोषाऽइन्द्रसगणोमरुद्भिः सोमम्पिबव्वृत्रहाशूरव्विद्वान्॥ जहिशत्रूँ
१ऽरप मृधोनुदस्वाथाभयङ्कृणुहि व्विश्वतो नः ॥२८१ ३७/७॥ त्रातारमि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपयुक्त० न्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूत मन्त्रसमु-

॥ ४३ ॥ मिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः ॥ २८२ $\frac{१०}{२०}$ ॥ यमावाहनमन्त्रो--य चय।

मायत्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहाघर्म्मायस्वाहाघर्म्मःपित्रे

॥२८३ $\frac{९}{३८}$ ॥सुगन्नुपन्थांप्रदिशन्नएहिज्योतिष्मध्येह्यजरन्नआयुः॥ अपै

तुमृत्युरमृतन्नआगाद्वैवस्वतोनोअभयंकृणोतु ॥२८४ पा०गृ०का०१

कं०५मं०११ कालावाहनमन्त्रः--कार्षिरसिसमुद्रस्यत्वाक्षित्याऽ ॥ ४३ ॥

उन्नयामि॥समापोऽअद्भिरग्मतसमोषधीभिरोषधीः॥२८५ $\frac{२८}{६}$ ॥ चित्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गुप्तावाहनमन्त्रः-चित्रांवसोस्वुस्तितेंपारमंशीय॥२८६ १८/३॥ इन्द्राण्या
वाहनमन्त्रः--अदित्यैरास्नासीन्द्राण्याऽउष्णीषं÷ ॥ पूषासिघर्म्मायं
दीष्व ॥ २८७ ३/३८ ॥ प्रजापत्यावाहनमन्त्रः--प्रजापतेनत्वदेतान्यन्यो
विश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुव्वयं
स्यामपतयोरयीणाम् ।२८८ ६५/२३। सर्पावाहनमन्त्रः-नमोऽस्तुसर्पेभ्योये
केचपृथिवीमनु॥येऽअन्तरिक्षेयेदिवितेभ्यः÷सर्पेभ्योनमः÷।२८९ ६/१३।
वाय्वावाहनमन्त्रः--आनोनियुद्भिः÷शतिनीभिरध्वरं सहस्रिणीभि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रूपंयाहिसुज्ञम् ॥ व्वायोऽअस्मिन्त्सर्वंनेमादयस्वयूयम्पांतस्वस्ति
भिःसदांनः ॥२९०$\frac{२८}{२७}$॥ सोमावाहनमन्त्रः—व्वयꣳसौमव्व्रतेतवमनंस्तनू
षुबिभ्रंतः ॥ प्रजावंन्तः सचेमहि ॥२९१$\frac{५६}{२}$॥ अश्विनावाहनमन्त्रः—
यावाङ्कशामधुमत्याश्विनासूनृतांवती॥तयांसुज्ञम्मिमिक्षतम्॥२९२$\frac{११}{७}$॥
वास्तोष्पत्यावाहनमन्त्रः--वास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोअ
नमीवोभवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे
॥२९३पा०का०३कं०४मं०७॥ अग्न्यावाहनमन्त्रः—त्वन्नोऽअग्नेतवं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवपायुभिर्मघोनौरक्षतन्त्वश्चवन्द्य ॥ त्रातातोकस्यतनंयेगवांमस्य निमेषꣳरक्षमाणस्तवव्रते ॥ २९४$\frac{१२}{३४}$ ॥ निर्ऋत्यावाहनमन्त्रः—असुन्व न्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्यमस्मदिच्छ सातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ २९५$\frac{६२}{१२}$ ॥ ग्रहपूजनमन्त्रः-ग्रहा ऽऊर्जाहुतयोव्यन्तोविप्रायमतिम् ॥ तेषांविशिप्रियाणांवोऽहमिषमू र्जꣳसमग्रभमुपयामगृहीतोऽसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रा यत्वाजुष्टतमम् ॥ सम्पृचौस्थꣳसंमाभद्रेणपृङ्क्तंविपृचौस्थोविमापाप्म

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नांपृक्तम् ॥२९६ ४/१६॥ अग्न्युत्तारणमन्त्राः--समुद्रस्यत्वावंकयाग्नेपरिंव्य
यामसि ॥ पावकोऽअस्मभ्यंꣳशिवोभंव ॥२९७ ४/१७॥ हिमस्यंत्वाजरायु
णाग्नेपरिंव्ययामासि॥पावकोऽअस्मभ्यंꣳशिवोभंव॥२९८ ५/१७॥उपज्मन्नु
पंवेतसेऽवंतरनदीष्वा ॥ अग्नेंपित्तमपामंसिमण्डूकिताभिरागंहिसेम
न्नोंयज्ञम्पांवकवंर्णꣳशिवङ्कृंधि ॥२९९ ६/१७॥ अपामिदंन्ययंनꣳसमुद्रस्यं
निवेशंनम् ॥अन्यांस्तेंऽअस्मत्तंपन्तुहेतयं÷पावकोऽअस्मभ्यंꣳशिवो
भंव॥३०० ७/१७॥अग्नेंपावकरोचिषांमन्द्रयां देवजिह्वयां॥आदेवान्वंक्षि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यक्षिच॥३०१ ८/१७॥सनःपावकदीदिवोऽग्नेदेवाँ२ऽइहावह॥ उपयज्ञꣳ
हविश्चनः॥३०२ ९/१७॥पावकयायश्चितयन्त्याकृपाक्षामन्रुरुचऽउषसोन
भानुना॥ तूर्वन्नयामन्नेतशस्यनूरणऽआयोघृणेनततृषाणोऽअजरः॥
॥३०३ १०/१७॥नमस्तेहरसे॰नृषदेवेडप्सुषदेवेड्बर्हिषदेवेड्वनसदेवेट्स्वर्विदे
वेट्॥३०४ ११/१७॥येदेवादेवानांयज्ञियायज्ञियानाꣳसंवत्सरीणमुपभागमा
सते॥अहुतादोहविषोयज्ञेऽअस्मिन्स्वयंपिबन्तुमधुनोघृतस्य॥३०५ १२/१७॥
येदेवादेवेष्वधिदेवत्वमायन्येब्रह्मणःपुरऽएतारोऽअस्य॥येभ्योनऋ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेपर्वतेधामाकिञ्चननतेदिवोनपृथिव्याऽअधिस्नुषु ॥ ३०६ $\frac{१४}{१७}$ ॥ प्राणदाऽअपानदाव्यानदावर्चोदावरिवोदाः ॥ अन्याँस्तेऽअस्मत्तपन्तुहेतयः पावकोऽअस्मभ्यꣳशिवोभव ॥ ३०७ $\frac{१६}{१७}$ ॥ प्रतिष्ठापनब्राह्मणम्—मनोजूतिर्जुषतामाज्यस्येतिमनसावाऽइदꣳसर्वमाप्तन्तन्मनसैवैतत्सर्वमाप्नोतिबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳसमिमंदधात्वितियद्विवृढंतत्संदधातिविश्वेदेवासऽइहमादयन्तामितिसर्वंवै विश्वेदेवाः सर्वेणैवैतत्संदधातिसयदिकामयेतब्रूयात्प्रतिष्ठेति ॥ ३०८ ॥ नेत्रोन्मीलनमन्त्रः—

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वृत्रस्यांसिकनीनकश्चक्षुर्द्दाऽअंसिचक्षुर्म्मेंदेहि ॥ ३०९ $\frac{३}{४}$ ॥ मातृका-
पूजनमन्त्रः--समंख्येदेुव्याधियासन्दक्षिणयोरुचंक्षसा ॥ मामुऽआ
युःप्प्रमोषीमोंऽअहन्तवंव्वीरंविदेयतवंदेविसन्दृशि ।३१० $\frac{२२}{४}$। नवाहुति
मन्त्राः-सत्वन्नोंऽअग्नेऽवमोभंवोतीनेदिंष्ठोऽअस्याऽउुषसोंव्युष्टौ॥ अ
वंयक्ष्वनोव्वरुंणह्ररांणोव्वीहिमृंडीकंसुहवोंनऽएधि॥३११ $\frac{४}{२१}$॥ अया
श्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयाअसि ॥ अयानोयज्ञंवहास्य
यानोधेहिभेषजंस्वाहा ॥ ३१२॥ येतेशतंवरुणयेसहस्त्रंयज्ञियाःपा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शावितताम॒हान्तः॥ तेभिर्नोऽअद्यसवितोताविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्क्काः॥ ३ १ ३॥ उदुत्तमंव्वरुणपाशमस्मदवाधमंव्विमध्यमꣳश्रथाय॥ अथाव्वयमादित्यव्व्रतेतवानागसोऽअदितयेस्याम।३१४ $\frac{१२}{१२}$। जलक्षेपणमन्त्रः-हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहा वक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथायस्वाहागन्धायस्वाहाघ्रातायस्वाहानिविष्टायस्वाहोपविष्टायस्वाहासन्दितायस्वाहावल्गतेस्वाहा सीनाय स्वाहाशयानायस्वाहास्वपतेस्वाहाजाग्रतेस्वाहाकूजते स्वाहाप्रबुद्धा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यस्वाहा विजृम्भमाणाय स्वाहा विवृत्ताय स्वाहासंहानाय स्वाहोप
स्थिताय स्वाहायनाय स्वाहा प्रायणाय स्वाहा ॥ ३१५ ७/२२ ॥ पूर्णाहुति-
मन्त्राः-समुद्रादूर्मिर्मधुमाँ २ उदारदुपा ७ शुनासममृतत्वमानट् ॥ घृ
तस्यनामगुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभिः ॥ ३१६ ८९/१७ ॥ वय
न्नामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारयामानमोभिः ॥ उपब्रह्माशृणव
च्छस्यमानञ्चतुः शृङ्गोऽवमीद्गौरऽएतत् ॥ ३१७ ९०/१७ ॥ चत्वारि ० त्रिधाहि
तम्पणिभिर्गुह्यमानङ्गविदेवासोघृतमन्वविन्दन् ॥ इन्द्रऽएकं सूर्य्यऽ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एकंअजा न वेनादेकꣳ स्वधया निष्टतक्षुः ॥ ३१८ ९२/१७ ॥ एताऽ अर्षन्ति
हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ॥ घृतस्य धाराऽ अभि
चाकशीमि हिरण्ययो वेतसो मध्यऽ आसाम् ॥ ३१९ ९३/१७ ॥ सम्म्य-
क्स्रवन्ति सरितो न धेनाऽ अन्तर्हृदा मनसा पूयमानाः । एतेऽ
अर्षन्त्यूर्म्मयो घृतस्य मृगाऽ इव क्षिपणोरीषमाणाः ॥ ३२० ९४/१७ ॥
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः॥ घृतस्य
धाराऽ अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ ३२१ ९५/१७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इति शुक्लयजुर्वेदीयकर्मोपयुक्तमन्त्रसमुच्चयः (मन्त्रसंहिता)

श्री जगद्गुरु विश्वाराध्य सिंहासन
ज्ञानमंदिरम्
जंगमवाड़ी मठ, काशी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri